# Shri Lakshmistotram Indrarachitam

# શ્રીલક્ષ્મીસ્તોત્રં ઇન્દ્રરચિતમ્

## Document Information

Text title : indra rachita lakShmIstotram

File name : indralaxmistotra.itx

Category : devii, lakShmI, stotra, vyAsa, devI

Location : doc_devii

Author : Indra

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com.com, Tanvir Chowdhury

Description-comments : DevibhagavatapurAna (9.42.8-11, 51-75), Brahmavaivarta 2(Prakriti Khanda).39.52-72

Latest update : December 21, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસ્તોત્રં ઇન્દ્રરચિતમ્

શ્રીસમ્પદાલક્ષ્મીસ્તોત્રમ્

(બ્રહ્મવૈવર્ત્તે ઇન્દ્રપ્રોક્તં દેવીભાગવતે ચ પુરન્દરપ્રોક્તમ્)

શ્રીગણેશાય નમઃ ।

ધ્યાનમ્ -

સહસ્રદલપદ્મસ્થકર્ણિકાવાસિનીં પરામ્ ।
શરત્પાર્વણકોટીન્દુપ્રભામુષ્ટિકરાં પરામ્ ॥ ૧॥

સ્વતેજસા પ્રજ્વલન્તીં સુખદૃશ્યાં મનોહરામ્ ।
પ્રતપ્તકાઞ્ચનનિભશોભાં મૂર્તિમતીં સતીમ્ ॥ ૨॥

રત્નભૂષણભૂષાઢ્યાં શોભિતાં પીતવાસસા ।
ઈષદ્ધાસ્યપ્રસન્નાસ્યાં શશ્વત્સુસ્થિરયૌવનામ્ ।
સર્વસમ્પત્પ્રદાત્રીં ચ મહાલક્ષ્મીં ભજે શુભામ્ ॥ ૩॥

ઇન્દ્ર ઉવાચ -

ૐ નમઃ કમલવાસિન્યૈ નારાયણ્યૈ નમો નમઃ ।
કૃષ્ણપ્રિયાયૈ સારાયૈ પદ્માયૈ ચ નમો નમઃ ॥ ૧॥

પદ્મપત્રેક્ષણાયૈ ચ પદ્માસ્યાયૈ નમો નમઃ ।
પદ્માસનાયૈ પદ્મિન્યૈ વૈષ્ણવ્યૈ ચ નમો નમઃ ॥ ૨॥

સર્વસમ્પત્સ્વરૂપાયૈ સર્વદાત્ર્યૈ નમો નમઃ ।
સુખદાયૈ મોક્ષદાયૈ સિદ્ધિદાયૈ નમો નમઃ ॥ ૩॥

હરિભક્તિપ્રદાત્ર્યૈ ચ હર્ષદાત્ર્યૈ નમો નમઃ ।
કૃષ્ણવક્ષઃસ્થિતાયૈ ચ કૃષ્ણેશાયૈ નમો નમઃ ॥ ૪॥

કૃષ્ણશોભાસ્વરૂપાયૈ રત્નપદ્મે ચ શોભને ।
સમ્પત્ત્યધિષ્ઠાતૃદેવ્યૈ મહાદેવ્યૈ નમો નમઃ ॥ ૫॥

શસ્યાધિષ્ઠાદેવ્યૈ ચ શસ્યાયૈ ચ નમો નમઃ ।
નમો બુદ્ધિસ્વરૂપાયૈ બુદ્ધિદાયૈ નમો નમઃ ॥ ૬॥

વૈકુણ્ઠે યા મહાલક્ષ્મીર્લક્ષ્મીઃ ક્ષીરોદસાગરે ।
સ્વર્ગલક્ષ્મીરિન્દ્રગેહે રાજલક્ષ્મીર્નપાલયે ॥ ૭॥

ગૃહલક્ષ્મીશ્ચ ગૃહિણાં ગેહે ચ ગૃહદેવતા ।
સુરભિ સા ગવાં માતા દક્ષિણા યજ્ઞકામની ॥ ૮॥

અદિતિર્દેવમાતા ત્વં કમલા કમલાલયે ।
સ્વાહા ત્વં ચ હવિર્દાને કવ્યદાને સ્વધા સ્મૃતા ॥ ૯॥

ત્વં હિ વિષ્ણુસ્વરૂપા ચ સર્વાધારા વસુન્ધરા ।
શુદ્ધસત્વસ્વરૂપા ત્વં નારાયણપરાયાણા ॥ ૧૦॥

ક્રોધહિંસાવર્જિતા ચ વરદા ચ શુભાનના ।
પરમાર્થપ્રદા ત્વં ચ હરિદાસ્યપ્રદા પરા ॥ ૧૧॥

યયા વિના જગત્ સર્વે ભસ્મીભૂતમસારકમ્ ।
જીવન્મૃતં ચ વિશ્વં ચ શવતુલ્યં યયા વિના ॥ ૧૨॥

સર્વેષાં ચ પરા ત્વં હિ સર્વબાન્ધવરૂપિણી ।
યયા વિના ન સમ્ભાષ્યો બાધ્વવૈર્બાન્ધવઃ સદા ॥ ૧૩॥

ત્વયા હીનો બન્ધુહીનસ્વત્વયા યુક્તઃ સબાન્ધવઃ ।
ધર્માર્થકામમોક્ષાણાં ત્વં ચ કારણરૂપિણી ॥ ૧૪॥

યથા માતા સ્તનાન્ધાનાં શિશૂનાં શૈશવે સદા ।
તથા ત્વં સર્વદા માતા સર્વેષાં સર્વરૂપતાઃ ॥ ૧૫॥

માતૃહીન સ્નનાન્ધસ્તુ સ ચેજ્જીવતિ દૈવતઃ ।
ત્વયા હીનો જનઃકોઽપિ ન જીવત્યેવ નિશ્ચિતમ્ ॥ ૧૬॥

સુપ્રસન્નસ્વરૂપા ત્વં માં પ્રસન્ના ભવામ્બિકે ।
વૈરિગ્રસ્તં ચ વિષયં દેહિ મહ્યં સનાતનિ ॥ ૧૭॥

વયં યાવત્ ત્વયા હીના બન્ધુહીનશ્ચ ભિક્ષુકાઃ ।
સર્વસમ્પદ્વિહીનાશ્ચ તાવદેવ હરિપ્રિયે ॥ ૧૮॥

રાજ્યં દેહિ શ્રિયં દેહિ બલં દેહિ સુરેશ્વરિ ।
કીર્તિ દેહિ ધનં દેહિ યશો મહ્યં ચ દેહિ વૈ ॥ ૧૯॥

કામં દેહિ મતિં દેહિ ભોગાન દેહિ હરિપ્રિયે ।
જ્ઞાનં દેહિ ચ ધર્મં ચ સર્વસૌભાગ્યમીપ્સિતમ્ ॥ ૨૦॥

પ્રભાવાં ચ પ્રતાપં ચ સર્વાધિકારમેવ ચ ।
જયં પરાક્રમં યુદ્ધે પરમૈશ્વર્યમેવ ચ ॥ ૨૧॥

ઇત્યુક્ત્વા ચ મહેન્દ્રશ્ચ સર્વૈઃ સુરગણૈઃ સહ ।
પ્રણમામ સાશ્રુનેત્રો મૂર્ધ્ના ચૈવ પુનઃ પુનઃ ॥ ૨૨॥

બ્રહ્મા ચ શઙ્કરશ્ચૈવ શેષો ધર્મશ્ચ કેશવઃ ।
સર્વેચક્રુઃ પરિહારં સુરાર્થે ચ પુનઃ પુનઃ ॥ ૨૩॥

દેવેભ્યશ્ચ વરં દત્વા પુષ્પમાલાં મનોહરામ્ ।
કેશવાય દદા લક્ષ્મીઃ સન્તુષ્ટા સુરસંસદિ ॥ ૨૪॥

યયુર્દેવાશ્ચ સન્તુષ્ટાઃ સ્વં સ્વં સ્થાનઞ્ચ નારદ ।
દેવી યયૌ હરેઃ સ્થાનં હૃષ્ટા ક્ષીરોદશાયિનઃ ॥ ૨૫॥ (હરેઃ ક્રોડં)

યયતુશ્ચૈય સ્વગૃહં બ્રહ્મેશાનૌ ચ નારદ ।
દત્ત્વા શુભાશિષં તૌ ચ દેવેભ્યઃ પ્રીતિપૂર્વકમ્ ॥ ૨૬॥

ઇદં સ્તોત્રં મહાપુણ્યં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ । (ચ પઠેન્નરઃ)
કુબેરતુલ્યઃ સ ભવેત્ રાજરાજેશ્વરો મહાન્ ॥ ૨૭॥

સિદ્ધસ્તોત્રં યદિ પઠેત્ સોઽપિ કલ્પતરુર્નરઃ ।
પઞ્ચલક્ષજપેનૈવ સ્તોત્રસિદ્ધિર્ભવેન્નૃણામ્ ॥ ૨૮॥

સિદ્ધસ્તોત્રં યદિ પઠેન્માસમેકં ચ સંયતઃ ।
મહાસુખી ચ રાજેન્દ્રો ભવિષ્યતિ ન સંશયઃ ॥ ૨૯॥

ઇતિ શ્રીબ્રહ્મવૈવર્ત્તે મહાપુરાણે દ્વિતીયે પ્રકૃતિખણ્ડે નારદનારાયણસંવાદે
લક્ષ્મીપૂજનવિધાનનામૈકોનચત્વારિંશત્તમોઽધ્યાયે લક્ષ્મીઉપાખ્યાને
ઇન્દ્રકૃતં લક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ । ૨(પ્રકૃતિ ખણ્ડ).૩૯.૫૨-૭૨

દેવીભાગવતપુરાણે નવમસ્કન્ધે અધ્યાય ૪૨

The Brahmavaivarta 2(Prakriti Khanda).39.52-72
and Devibhagavata versions differ
quite a bit.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, Tanvir Chowdhury

*Shri Lakshmistotram Indrarachitam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*